महाष्टमी, स्त्री, (महत्या महादेव्या अष्टमी । महती अष्टमीति वा ।) आश्विनशुक्लाष्टमी । यथा,—

"आश्विने शुक्लपक्षस्य भवेद् या अष्टमी तिथिः ।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा ॥"

इति कालिकापुराणे ५९ अध्यायः ॥

तस्यां पूजाविधिः पुत्त्रवत उपवासनिषेधश्च यथा,—

"अष्टम्यां रुधिरैर्मांसैर्महामांसैः सुगन्धिभिः ।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवाम् ॥
सिन्दूरैः पट्टवासैश्च नानाविधविलेपनैः ।
पुष्पैरनेकजातीयैः फलैर्बहुविधैरपि ॥
उपवासं महाष्टम्यां पुत्त्रवान् न समाचरेत् ।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत् ॥
पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा ।
विसर्जयेद्दशम्यान्तु श्रवणे शावरोत्सवैः ॥"

इति तत्रैव ६० अध्यायः ॥

तत्रार्द्धरात्रपूजा । यथा,—

"कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥
पूजां समारभेद्देव्या नवम्यां वासरेऽपि वा ।
पशुघातश्च कर्त्तव्यो गवलाजवधस्तथा ॥"

इति देवीपुराणवचने नारणपदेन पूर्व्वाषाढ़ोच्यते । इति तिथ्यादितत्त्वम् ॥

महासन्नः, पुं, (महानतिशयः सन्नो विषण्णः कुदेहत्वात् । यद्वा, महतो हिमाद्रेर्महादेवस्य वा आसन्नः निकटवर्त्ती ।) कुवेरः । इति शब्दमाला ॥ (महदतीवासन्नः) अतिनिकटश्च ॥

महासफरः, पुं, (महांश्चासौ सफरश्च ।) बृहत् प्रोष्ठीमत्स्यः । अस्य गुणाः । यथा,—

"महासफरसंज्ञस्तु तिक्तः पित्तकफापहः ।
शिशिरो मधुरो रुच्यो वातसाधारणः स्मृतः ॥"

इति भावप्रकाशः ॥

महासमङ्गा, स्त्री, (महती चासौ समङ्गा च ।) क्षुपविशेषः । कगहिया इति हिन्दीभाषा । तत्पर्य्यायः । ओदनिका २ ओदनाह्वया ३ वक्रा ४ खरा ५ दृढबला ६ नकुला ७ भुजङ्गजिह्वा ८ शीतपाकिनी ९ शीतबला १० शीताबला ११ बलोत्तरा १२ बला १३ खिरहिट्टी १४ व्यालजिह्वा १५ । अस्या गुणाः । मधुरत्वम् । अम्लत्वम् । दोषत्रयनाशित्वम् । युक्त्या युद्धा प्रयोगे ज्वरदाहनाशित्वञ्च । इति राजनिर्घण्टः ॥

महासर्ज्जः, पुं, (महांश्चासौ सर्ज्जश्च ।) पनसः । असनवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"अजकर्णो वनेसर्ज्जो महासर्ज्जोऽसनस्तु सः ॥")

महासहः, पुं, (सहते इति । सह + अच् । महान् सहः ।) कुब्जकवृक्षः । इति राजनिर्घण्टः ॥ (वाणपुष्प इति गौड़ादौ प्रसिद्धः । यथास्य पर्य्यायः ।

"अम्लातोऽम्लाटनः प्रोक्तस्तथाम्लातक इत्यपि ।
कुरण्टको वर्णपुष्पः स एवोक्तो महासहः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महासहा, स्त्री, (महासह + स्त्रियां टाप् ।) माषपर्णी । (पर्य्यायोऽस्या यथा,—

"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा ।
क्षुद्रसहा च काम्बोजी पाण्डुलोमशपर्णिनी ॥"

इति वैद्यकरत्नमालायाम् ॥

पर्य्यायान्तरं यथा,—

"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका ।
पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

अम्लानवृक्षः । इत्यमरः ।२।४।७३ । (कुब्जकः । तत्पर्य्यायो यथा,—

"कुब्जको भद्रतरुणी वृहत्पुष्पोऽतिकेशरः ।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महासान्तपनं, क्ली, (महत् सान्तपनम् ।) व्रतविशेषः । यथा । अथ महासान्तपनम् । तत्र द्वादशसाध्यसान्तपनमुक्तं याज्ञवल्क्यः ।

"पृथक्सान्तपनैर्द्रव्यैः षड़हः सोपवासकः ।
सप्ताहेनैव कृच्छ्रोऽयं महासान्तपनः स्मृतः ॥

एतत् सप्ताहसाध्यम् । जावालः ।

"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकैकं क्रमशोऽश्नीयादहोरात्रमभोजनम् ॥
कृच्छ्रः सान्तपनो नाम सर्व्वपापप्रणाशनः ।
एकैकमेतदेवं हि त्रिरात्रमुपयोजयेत् ॥
त्र्यहञ्चोपवसेदन्त्यं महासान्तपने विधिः ॥"

एतत् सप्ताहसाध्यसान्तपनमुक्ता एकविंशतिदिनसाध्यं महासान्तपनमुक्तम् । महासान्तपनं धेनुषट्कदानसमम् । जावालोक्तमहासान्तपनस्य एकविंशतिदिनसाध्यत्वेन सप्ताहसाध्यसान्तपनात् त्रिगुणत्वान्महासान्तपने धेनुषट्कं देयम् । इति प्रायश्चित्तविवेकः ॥

महासारः, पुं, (महान् सारः स्थिरांशो यस्य ।) दुष्खदिरः । इति राजनिर्घण्टः ॥

महासाहसं, क्ली, (महच्च तत् साहसञ्च ।) अतिबलात्कारकृतकार्य्यम् । अतिशयदण्डः । इति साहसशब्दार्थे मेदिनी । से, ४५ ॥ (महत् साहसमत्र ।) अतिदुष्कृतकर्म्म । अतिशयदैवः । इति साहसशब्दार्थे हेमचन्द्रः । ३ । ४०० ॥

महासाहसिकः, त्रि, (महानतिशयः साहसिकः ।) चौरः । इति केचित् ॥ अतिसाहसयुक्तश्च । बलपूर्व्वापहारकः । यथा,—

"चाटतस्करदुर्व्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ॥"

इति याज्ञवल्क्यवचनम् ॥

चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति । प्रच्छन्नापहारिणः तस्कराः । दुर्व्वृत्ताः इन्द्रजालिककितवादयः । सहो बलं सहसा बलेन कृतं साहसं महच्च तत् साहसञ्च महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः । इति मिताक्षरायामाचाराध्यायः १ ॥

महासिंहः, पुं, (महान् सिंह इव ।) शरभः । इति राजनिर्घण्टः ॥ (महांश्चासौ सिंहश्च ।) वृहत्सिंहः । स च देवीवाहनम् । यथा,—

"उत्थाय च महासिंहं देवी चण्डमधावत ।"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

महासुखं, क्ली, (महत् सुखमस्मिन् ।) शृङ्गारः । इति त्रिकाण्डशेषः ॥ (महच्च तत् सुखञ्च ।) अतिशयानन्दः । महत् सुखमस्य तद्वति, त्रि ॥)

महासुखः, पुं, (महत् सुखं ईश्वरानन्दोऽस्य अस्माद् वा ।) बुद्धः । इति त्रिकाण्डशेषः ॥

महासुगन्धा, स्त्री, (महान् सुगन्धोऽस्याः ।) गन्धनाकुली । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । उत्तरतन्त्रे २६ अध्याये ।

"महासुगन्धामथवा पालिन्दीचाम्लपेषिताम् ।
शीतांश्चात्र परीषेकान् प्रदेहांश्च योजयेत् ॥")

अतिसुगन्धयुक्ते त्रि ॥

महासूक्ष्मा, स्त्री, (महदतीव सूक्ष्मा ।) बालुका । इति राजनिर्घण्टः ॥ अतिशयसूक्ष्मे, त्रि ॥

महासेनः, पुं, (महती सेना यस्य ।) कार्त्तिकेयः । इत्यमरः ।१।१।४१॥ (यथा अनर्घराघवे ।४।३२।

"महासेनो यस्य प्रमदयमदंष्ट्रासहचरैः
शरैर्मुक्तो जीवन्निरिव शरजन्मा समभवत् ।
इमाञ्च चक्षाणां भुजवनमहादुर्गविषमा
मयं वीरो वाराजयदुपविंशान् वसुमतीम् ॥"

महती सेना अनुचरोऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ महासेनापतिः । इति मेदिनी । ने, २०१ ॥ (यथा महाभारते । ५ । १६१ । ११ ।

"स च राजा दशार्णेषु महानासीत् सुदुर्जयः ।
हिरण्यवर्म्मा दुर्द्धर्षो महासेनो महामनाः ॥")

दृताहृतपिष्टविशेषः । इति हेमचन्द्रः । राजविशेषः । यथा, कथासरित्सागरे ।११।३४॥

"जयसेनस्य तस्याथ पुत्त्रोऽप्रतिमदोर्बलः ।
समुत्पन्नो महासेननामा नृपतिकुञ्जरः ॥")

महास्कन्धा, स्त्री, (महान् स्कन्धः शाखावधिभागो यस्याः ।) जम्बुवृक्षः । इति राजनिर्घण्टः ॥ (महान् स्कन्धोऽस्य ।) वृहत्स्कन्धयुक्ते त्रि ॥

महास्थली, स्त्री, (स्थल + "जानपदकुण्डगोणेत्यादि ।" ४ । १ । ४२ । इति ङीष् । महती स्थली ।) पृथिवी । इति शब्दमाला ॥ श्रेष्ठस्थानञ्च ॥

महास्नायुः, पुं, (महती स्नायुः अस्थिबन्धननाड़ी ।) कण्डरा । इति हेमचन्द्रः । ३ । २९५ ॥

महास्रग्वी, [न्] पुं, (महती स्रक् अस्थिमाला । सा अस्त्यस्येति विनिः ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ।१३।१७।१३४॥

महास्वनः, पुं, (महान् स्वनः शब्दो यस्य ।) मल्लतूर्य्यम् । इति त्रिकाण्डशेषः ॥ (महान् स्वनः ।) वृहच्छब्दः । तद्युक्ते, त्रि ॥ (यथा, महाभारते । ५ । १५ । ५ ।